१

शिवराजविजयः - बटुसंवादः

प्रस्तावना

कवेः भावयित्रीप्रतिभया समुद्भूतं कर्म भवति काव्यम्। तच्च काव्यं ध्वनिकाव्यं गुणीभूतव्यङ्ग्यं चेति द्वैविध्यं गतम्। तत्र पुनः दृश्यं श्रव्यं चेति भेदद्वयम्। तत्र श्रव्यकाव्यं पुनः गद्यं पद्यं चेति द्विविधम्। तत्र निखिलसंस्कृतसाहित्ये छन्दोमयात् पद्यादनन्तरमेव गद्यकाव्यस्याभ्युदयः। गद्यं प्रथमं कृष्णयजुर्वेदस्य तैत्तिरीयसंहितायां दृश्यते इति बलदेवोपाध्यायमहाभागस्याशयः। कविप्रतिभायाः परीक्षणस्थलं भवति गद्यकाव्यम्, यथा सुवर्णपरीक्षणस्थलं भवति निकषम्। निकषे कषिता सुवर्णस्य रेखा एव सुवर्णस्य वैशिष्ट्यं सूचयति एवमेव गद्यस्य एका पङ्क्तिरेव केवः रससिद्धतां वचनवक्रतां चिन्तनपद्धतिं चारुतया सूचयति। अतः प्रसिद्धा इयं भणितिः – "गद्यं कवीनां निकषं वदन्ति" इति।। पद्यकाव्ये तु आदौ छन्दसि दृष्टिपातो भवति। परन्तु गद्यकाव्ये प्रथमदृष्टिपातः पदसन्निवेशे भवति।

बाणभट्टाद् आरभ्य गद्यकाव्यसंरचनपरम्परायां विद्यमानेषु कविषु अम्बिकादत्तव्यासः अन्यतमः प्रसिद्धश्च। अयं जयपुरनिवासी कविः पुराणकर्तुः व्यासस्य द्विरवतारः इति प्रसिद्धिः। अनेन बहवः संस्कृतभाषया हिन्दीभाषया च ग्रन्था विरचिताः। तद्विरचितेषु ग्रन्थेषु शिवराजविजयः इति ऐतिहासिकं गद्यकाव्यं महत्स्थानं बिभर्ति। काव्यमिदं महाराष्ट्राधीशं शिवराजमाश्रित्य लिखितम्। ऐतिहासिक–वृत्तान्तसमाश्रयणेन काव्यस्यास्य लेखनाद् इयम् आख्यायिका इति वक्तुं शक्यते।

अधर्मस्य मूलविग्रहाः यवनाः यदा अस्माकम् उपरि शासनं कृतवन्तः, अस्माकं परम्परायाः नीतेश्च नाशं कृतवन्तः, तदा दक्षिणदेशे सनातनधर्मस्य रक्षणे नियुक्तः आसीद् एकः वीरः। स एव शिवराजः। शिवराजस्य जननी जीजाबाई जनकश्च शाहजी भोसले आसीत्। एतस्य सनातनपरम्परासंरक्षकस्य शिवराजस्य विजययात्रामाश्रित्य एव अस्य काव्यस्य विकाशः।

अस्य प्रथमविरामस्य प्रथमनिःश्वासस्य प्रथमतः केचन परिच्छेदाः अध्येयत्वेन चिताः। अस्मिन् पाठे सूर्योदयस्य, गौरवटोः श्यामवटोः स्वरूपं वार्तालापः, योगिराजस्य समाधित उत्थानम् इत्येते विषयाः क्रमशः वर्णिताः।

उद्देश्यानि

अमुम् पाठं पठित्वा भवान् -

- हिन्दुपरम्परायां भगवतः सूर्यस्य महिमानं जानीयात्।
- गौरवटोः स्वरूपं जानीयात्।
- श्यामवटोः स्वरूपं जानीयात्।
- तयोः वार्तालापप्रसङ्गं जानीयात्।
- योगिराजप्रसङ्गं जानीयात्।
- पाठ्यांशस्य अन्वयार्थसङ्गमनं जानीयात्।
- पाठ्यांशस्थानां पदानां व्याकरणविमर्शं पर्यायशब्दान् च जानीयात्।

९.१) सम्पूर्णः मूलपाठः

"विष्णोर्माया भगवती यया सम्मोहितं जगत्।"(भागवतम्१०।१।२५)

"हिंस्रः स्वपापेन विहिंसितः खलः

साधु समत्वेन भयाद् विमुच्यते।" (भागवतम्, १०।७।३१)

"अरुण एष प्रकाशः पूर्वस्यां भगवतो मरीचिमालिनः। एष भगवान् मणिराकाशमण्डलस्य, चक्रवर्ती खेचरचक्रस्य, कुण्डलमाखण्डलदिशः, दीपको ब्रह्माण्डभाण्डस्य, प्रेयान् पुण्डरीकपटलस्य , शोकविमोकः कोकलोकस्य, अवलम्बो रोलम्बकदम्बस्य, सूत्रधारः सर्वव्यवहारस्य, इनश्च दिनस्य। अयमेव अहोरात्रं जनयति, अयमेव वत्सरं द्वादशसु भागेषु विभनक्ति, अयमेव कारणं षण्णामृतूनाम्, एष एवाङ्गीकरोति उत्तरं दक्षिणं चायनम्, एनेनैव सम्पादिता युगभेदाः, एनेनैव कृताः कल्पभेदाः, एनमेवाश्रित्य भवति परमेष्ठिनः परार्धसङ्ख्या, असावेव चर्कर्ति बर्भर्ति जर्हर्ति च जगत्, वेदा एतस्यैव वन्दिनः, गायत्री अमुमेव गायति, ब्रह्मनिष्ठा ब्राह्मणा अमुमेवाहरहरुपतिष्ठन्ते। धन्य एष कुलमूलं श्रीरामचन्द्रस्य, प्रणम्य एष विश्वेषामि"ति उदेष्यन्तं भास्वन्तं प्रणमन् निजपर्णकुटिरात् निश्चक्राम कश्चित् गुरुसेवनपटुर्विप्रवटुः।

"अहो चिररात्राय प्रसुप्तोऽहम्, स्वप्नजालपरतन्त्रेणैव महान् पुण्यमयः समयोऽतिवाहितः, सन्ध्योपासनसमयोऽयमस्मद्गुरुचरणानाम्, तत् सपदि अवचिनोमि कुसुमानि।" इति चिन्तयन् कदलीदलमेकमाकुञ्च्य, तृणशकलैः सन्धाय, पुटकं विधाय, पुष्पावचयं कर्तुमारेभे।

वटुरसौ आकृत्या सुन्दरः, वर्णेन गौरः, जटाभिर्ब्रह्मचारी, वयसा षोडशवर्षदेशीयः, कम्बुकण्ठः, आयतललाटः, सुबाहुर्विशाललोचनश्चासीत्।

कदलीदलकुञ्जायितस्य एतत्कुटीरस्य समन्तात् पुष्पवाटिका, पूर्वतः परम–पवित्र–पानीयं परस्सहस्र–पुण्डरीक–पटल–परिलसितं पतत्रिकुल–कूजितपूजितं पयःपूरितं सर आसीत्। दक्षिणतश्चैको निर्झर–झर्झर–ध्वनित–दिगन्तरः, फल–पटलाऽऽस्वाद–चपलित–

चञ्चु–पतङ्गकुलाऽऽ–क्रमणाधिक–विनत–शाख–शाखि समूह–व्याप्तः सुन्दरकन्दरः पर्वतखण्ड आसीत्।

यावदेष ब्रह्मचारी वटुरलिपुञ्जमुद्धूय कुसुमकोरकानवचिनोति, तावत् तस्यैव सतीर्थ्योऽपरस्तत्समानवयाः कस्तूरिका-रेणुरूषित इव श्यामः, चन्दनचर्चित-भालः कर्पूरागुरु-क्षोदच्छुरित-वक्षो-बाहु-दण्डः, सुगन्धपटलै-रुन्निद्रयन्निव निद्रामन्थराणि कोरकनिकुरम्बकान्तरालसुप्तानि मिलिन्दवृन्दानि झटिति समुपसृत्य निवारयन् गौरवटुमेवमवादीत्-

'अलं भो अलम्! मयैव पूर्वमवचितानि कुसुमानि, त्वं तु चिरं रात्रावजागरीरिति क्षिप्रं नोत्थापितः, गुरुचरणा अत्र तडागतटे सन्ध्यामुपासन्ते, संस्थापिता मया निखिला सामग्री तेषां समीपे। यां च सप्तवर्षकल्पाम्, यवनत्रासेन निःशब्दं रुदतीम्, परमसुन्दरीम्, कलितमानवदेहामिव सरस्वतीं सान्त्वयन्, मरन्दमधुरा अपः पाययन्, कन्दखण्डानि भोजयन्, त्वं त्रियामाया यामत्रयमनैषीः, सेयमधुना स्वपिति, उद्बुद्ध्य च पुनस्तथैव रोदिष्यति, तत्परिमार्गणीयान्येतस्याः पितरौ गृहं च -'

इति संश्रुत्य उष्णं निःश्वस्य यावत् सोपि किञ्चिद् वक्तुमियेष तावदकस्मात् पर्वतशिखरे निपपात तयोर्दृष्टिः।

तस्मिन् पर्वते आसीदेको महान् कन्दरः। तस्मिन्नेव महामुनिरेकः समाधौ तिष्ठति स्म। कदा स समाधिमङ्गीकृतवानिति कोऽपि न वेत्ति। ग्रामणी-ग्रामीण-ग्रामाः समागत्य मध्ये मध्ये तं पूजयन्ति, प्रणमन्ति स्तुवन्ति च। तं केचित् कपिल इति, अपरे लोमश इति, इतरे जैगीषव्य इति अन्ये च मार्कण्डेय इति, विश्वसन्ति स्म। स एवायमधुना शिखरादवतरन् ब्रह्मचारिवटुभ्यामदर्शि।

'अहो! प्रबुद्धो मुनिः! प्रबुद्धो मुनिः! इत एवागच्छति, इत एवागच्छति, सत्कार्योऽयं सत्कार्योऽयम्' इति तौ सम्भ्रन्तौ बभूवतुः।

अथ समापितसन्ध्यावन्दनादिक्रिये समायाते गुरौ, तदाज्ञया नित्यनियमसम्पादनाय प्रयाते गौरवटौ, छात्रगणसहकारेण प्रस्तुतासु च स्वागतसामग्रीषु, 'इत आगम्यताम्, सनाथ्यतामेष आश्रमः' इति सप्रणाममभिगम्य वदत्सु निखिलेषु , योगिराज आगत्य तन्निर्दिष्टकाष्ठपीठं भास्वानिवोदयगिरिमारुरोह, उपाविशच्च।

तस्मिन् पूज्यमाने, 'योगिराडुत्थित' इति, आयात इति च आकर्ण्य, कर्णपरम्परया बहवो जनाः परितः स्थिताः। सुघटितं शरीरम्, सान्द्रां जटाम्, विशालान्यङ्गानि, अङ्गारप्रतिमे नयने, मधुरां गम्भीराञ्च वाचं वर्णयन्तश्चकिता इव सञ्जाताः।

९.२) साम्प्रतं मूलपाठमवगच्छाम – १

"विष्णोर्माया भगवती यया सम्मोहितं जगत्।"(भागवतम्१०।१।२५)

"हिंस्रः स्वपापेन विहिंसितः खलः

साधु समत्वेन भयाद् विमुच्यते।" (भागवतम्, १०।७।३१)

अन्वयार्थः - विष्णोः चराचरं विवेष्टि व्याप्नोति इति विष्णुः, तस्य जगद्व्यापकस्य नारायणस्य माया त्रिगुणमयी सत्त्वप्रधाना शक्तिः भगवती भगप्रभृतिषडैश्वर्यसम्पन्ना। कीदृशी सा इति तदुच्यते, यया सत्त्वप्रधानया मायया जगत् गच्छतीति जगत् निखिलं भुवनं सम्मोहितं चारुतया मोहेन वशीकृतम्।

हिंस्रः हिंसनशीलः खलो दुर्जनः स्वपापेन निजकृतेन पातकेन विहिसिंतः घातितः। साधुः सज्जनः समत्वेन रागद्वेषादिविरहिततया समत्वभावनया भयाद् भीतेः विमुच्यते मुक्तिं प्राप्नोति।

व्याख्यानम् - गद्यकाव्यस्यास्य विरामत्वेन विभागाः परिकल्पिताः। तत्र ग्रन्थादौ प्रथमे विरामे "समाप्तिकामो मङ्गलमाचरेत्" इति शिष्टाचारानुमितश्रुतिम् अनुसृत्य ग्रन्थस्य निर्विघ्नं परिसमाप्तये शिष्यशिक्षणाय च मङ्गलं विदधाति कविः अम्बिकादत्तव्यासः भागवतस्य श्लोकांशद्वयस्य उद्धरणेन। मङ्गलं त्रिविधं भवति - आशीर्वादात्मकं नमस्कारात्मकं वस्तुनिर्देशात्मकं च।

विष्णोर्माया इति प्रस्तुतेन श्लोकार्धेन देवतानमस्कारात्मकं मङ्गलं विहितम्। नमस्कारो हि नमस्कर्तुः अपकर्षबोधनं नमस्कार्य चोत्कर्षख्यापनं भवति। विष्णोर्माया इत्यत्र नमस्कारवाचकपदाभावः अस्ति चेदपि जगतः तन्मायाधीनत्वकथनात् जगति विद्यमानेभ्यः सर्वेभ्यः विष्णुः उत्कृष्टः इति बुध्यते। एवं विष्णोः नमस्कारविधानात् नमस्कारात्मकं भवति मङ्गलम्।

चराचरं विवेष्टि व्याप्नोति इति विष्णुः। तस्य नारायणस्य या भगवती भगप्रभृतिषडैश्वर्यसम्पन्ना माया सा समस्तं संसारं मोहयति। मोहो हि अविवेकः। मुग्धो जनो विवेचनाय न समर्थो भवति। यथा कस्मिंश्चिद् विषये तन्मयताम् आपन्नो जनो नान्यत् किञ्चिज्जानाति मायया मुग्धो जनोऽपि तथैव मायानिर्मितं लौकिकं वस्तुजातं विहाय अलौकिकं परमेश्वरतत्त्वं नावगच्छति। एषा अनवगतिरेव संसारे पुनरावर्तनस्य जननमरणचक्रे पतनस्य दुःखानुभूवस्य च मूलम्।

सा माया भगवती। मायाशक्तिः भगवतो न भिन्ना। दाहिका शक्तिर्यथा अग्नितो न भिन्ना मायाशक्तिरपि भगवतः विष्णुतो न भिन्ना। शक्ति- शक्तिमतोः नास्ति कश्चन भेदः। अतो यथैव भगवान् षडैश्वर्यसम्पन्नः भगवतः शक्तिरूपिणी मायापि तथैव षडैश्वर्यशालिनी। भगोऽस्यास्तीति भगवान्। भगशब्दस्य अर्थनिरूपणप्रसङ्गे उक्तम् -

ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः।

ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरिणा।। इति।

एते ऐश्वर्यादयः षड्गुणाः भगवति पूर्णतया सदैव विराजमानाः। भगवतो भिन्नायां तच्छक्तौ अपि एते गुणा अवतिष्ठन्ते। अतः शक्तिरपि भगवतीति कथ्यते। एषा भगवतः शक्तिः भगवती माया दुर्गाकालिकादिरूपेण पुराणेषु उपवर्णिता। सा त्रिगुणमयी। त्रिषु गुणेषु अन्यतमं तमः। आवरणं नाम तमः। यथा तमसा आवृतो भवति प्रकाशः तथैव मायायाः तमोगुणेनापि आवृतं भवति ज्योतिःस्वरूपं परमतत्त्वम्।

हिंस्रः स्वपापेन इति श्लोकार्धेन वस्तुनिर्देशात्मकं मङ्गलं विदधाति कविः।अत्र काव्ये हिंस्रानां यवनशासकानां दुष्कर्मजनिता विनष्टिः तथा ग्रन्थनायकस्य सज्जनप्रवरस्य शिवराजस्य स्वपुण्यजनिता विजयरूपा अभ्युन्नतिः प्रदर्शिता। अतः मङ्गलमिदं वस्तुनिर्देशात्मकम् एव।

हिंस्रा हि मानवाः पापशीलाः। पातकञ्च मानवं नरके पातयति। दुर्जनाः दुष्कर्माणि कुर्वन्तः तज्जन्यपापैः काले विनश्यन्ति। तथा हि कंसादिपापाः स्वपापैरेव विनष्टाः। उच्यते च - "अनार्यजुष्टेन पथा प्रवृत्तानां शिवं कुतः" इति। किन्तु साधवः सत्कर्मभिः परित्राणं लभन्ते। सत्कर्मभिरेव धर्मो भवति। येन अयं धर्मो रक्ष्यते धर्मोऽपि तेन पुंसा रक्ष्यमाणः तं जनं रक्षति। तथा हि युधिष्ठिरादयः पाण्डवा विपदि पतिताः सन्तोऽपि स्वार्जितपुण्यैः अभ्युदयं लब्धवन्तः। उक्तञ्च गीतायां - "स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्" इति। एवं दुर्जननिन्दासज्जनप्रशंसाभ्यां सहृदयानां पाठकानां मङ्गलं विधीयते।

व्याकरणविमर्शः

- भगवती - भगः अस्य अस्तीति विग्रहे भगशब्दात् मतुपि भगवत् इति शब्दो निष्पद्यते। ततः स्त्रियां ङीपि सौ भगवती इति रूपम्।
- स्वपापेन – स्वं पापं स्वपापम्, तेन स्वपापेनेति कर्मधारयसमासः।
- विहिंसितः - विपूर्वकात् हिंस्धातोः क्तप्रत्यये विहिंसितशब्दो निष्पन्नः। ततः सौ विहिंसितः इति रूपम्।

कोषः

- "विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टरश्रवाः" इत्यमरः।
- "अथो जगती लोको विष्टपं भुवनं जगत्" इत्यमरः।
- "दरस्त्रासो भीतिर्भीः साध्वसं भयम्" इत्यमरः।

पाठगतप्रश्नाः – १

१. कया सम्मोहितं जगत्।
२. कः स्वपापेन विहिंसितो भवति।
३. कः कथं भयाद् विमुच्यते।
४. विष्णोर्मायेति कीदृशं मङ्गलम्।
५. हिंस्रः इति कीदृशं मङ्गलम्।

१.३) साम्प्रतं मूलपाठमवगच्छाम – २

"अरुण एष प्रकाशः पूर्वस्यां भगवतो मरीचिमालिनः। एष भगवान् मणिराकाशमण्डलस्य, चक्रवर्ती खेचरचक्रस्य, कुण्डलमाखण्डलदिशः, दीपको ब्रह्माण्डभाण्डस्य, प्रेयान् पुण्डरीकपटलस्य , शोकविमोकः कोकलोकस्य, अवलम्बो रोलम्बकदम्बस्य, सूत्रधारः सर्वव्यवहारस्य, इनश्च दिनस्य। अयमेव अहोरात्रं जनयति, अयमेव वत्सरं द्वादशसु भागेषु विभनक्ति, अयमेव कारणं षण्णामृतूनाम्, एष एवाङ्गीकरोति उत्तरं दक्षिणं चायनम्, एनेनैव सम्पादिता युगभेदाः, एनेनैव कृताः कल्पभेदाः, एनमेवाश्रित्य भवति परमेष्ठिनः परार्धसङ्ख्या, असावेव चर्कर्ति बर्भर्ति जर्हर्ति च जगत्, वेदा एतस्यैव वन्दिनः, गायत्री अमुमेव गायति, ब्रह्मनिष्ठा ब्राह्मणा अमुमेवाहरहरुपतिष्ठन्ते। धन्य एष कुलमूलं श्रीरामचन्द्रस्य, प्रणम्य एष विश्वेषामि"ति उदेष्यन्तं भास्वन्तं प्रणमन् निजपर्णकुटिरात् निश्चक्राम कश्चित् गुरुसेवनपटुर्विप्रवटुः।

अन्वयार्थः - भगवतः ईशस्य मरीचिमालिनः सूर्यस्य पूर्वस्यां प्राच्यां दिशि एषः अयम् अरुणः लोहितः प्रकाशः आलोकः। एषः अयं भगवान् दिवाकरः आकाशमण्डस्य गगनमण्डलस्य मणिः रत्नम्, खेचरचक्रस्य खेचरस्य चक्रस्य तारासमुदायस्य चक्रवर्ती सार्वभौमः प्रभुः, आखण्डलदिशः आखण्डलस्य इन्द्रस्य दिशः दिग्भागस्य पूर्वदिशः कुण्डलं कर्णवेष्टनम्, पूर्वदिशः कर्णाभरणरूपः इत्यर्थः। ब्रह्माण्डभाण्डस्य ब्रह्माण्डभवनस्य दीपकः प्रकाशः। पुण्डरीकपटलस्य कमलसमुदायस्य प्रेयान् नितान्तप्रियः, सूर्यः कमलानां प्रियतमः इत्यर्थः। कोकलोकस्य चक्रवाकसमुदायस्य शोकविमोकः शोकस्य दुःखस्य विमोकः अपहारकः नाशकः। चक्रवाकपक्षिणां रात्रौ स्वप्रियातः वियोगो भवति। सूर्ये उदिते दुःखं मिलनेन अपगतं भवति इत्यर्थः। रोलम्बकदम्बस्य रोलम्बस्य द्विरेफस्य कदम्बः व्रातस्य अवलम्बः आश्रयः, मधुकरसमुदायस्य आश्रयभूतः भास्करः इत्यर्थः। सर्वव्यवहारस्य सर्वविधकार्याणां सूत्रधारः प्रवर्तकः, सकलकार्याणाम् आरम्भकः सूर्यः। दिनस्य दिवसस्य इनः स्वामी, दिवसस्य प्रभुः सूर्यः इति। अयं सूर्यः एव अहोरात्रं दिवसं रात्रिं च जनयति, दिनरात्र्योः नियन्त्रकः इत्यर्थः। अयं सूर्यः एव वत्सरं वर्षं द्वादशसु द्वादशभागेषु भागेषु विभागेषु विभनक्ति विभाजयति, यतो हि सूर्यस्य गतिं दृष्ट्वा एव वर्षस्य निर्णयः भवति। अयं सूर्यः एव षण्णाम् ऋतूनाम् कारणं हेतुभूतम्, सूर्यस्य प्रकाशादिकं निर्णीय ऋतुगणना एव भवति। एषः सूर्यः एव उत्तरम् उदीचीं दक्षिणं अवाचीं च अयनम् स्वीयमार्गम् अङ्गीकरोति स्वीकरोति। एनेन भास्करेण एव युगभेदाः सत्यत्रेताद्वापरकलयः युगाः सम्पादिताः कृताः। एनेनैव सूर्येण कल्पभेदाः द्विसहस्रदेवयुगात्मकाः कालभेदाः कृताः व्यवस्थापिताः। एनमेव भास्करम् एव आश्रित्य अवलम्ब्य परमेष्ठिनः ब्रह्मणः परार्द्धसंख्या चरमा परार्धनाम्नी संख्या भवति। असौ सविता एव जगत् भुवनं चर्कर्ति पुनः पुनः करोति, बर्भर्ति पुनः पुनः भरति, जर्हर्ति पुनः पुनः हरति। वेदाः ऋग्-यजुः-साम-अथर्वाः एतस्यैव सूर्यस्यैव वन्दिनः स्तुतिवाचकाः। गायत्री अमुमेव आदित्यम् एव गायति स्तौति। ब्रह्मनिष्ठाः वेदवेत्तारः ब्रह्मणि निष्ठाः ब्राह्मणाः अमुम् एव भास्करम् एव अहरहः प्रत्यहम् उपतिष्ठन्ते उपासते। श्रीरामचन्द्रस्य दशरथपुत्रस्य कूलमूलं वंशाग्रजः अयं सूर्यः। एष भास्करः, धन्यः प्रशंसायाः योग्यः, विश्वेषां समेषां जनानाम् प्रणम्यः वन्दनीयः - इति इत्थम् उदेष्यन्तम् उदीयमानं भास्वन्तं सूर्यं प्रणमन्

नमस्कुर्वन् निजपर्णकुटिरात् स्वपत्रोटजातात् स्वकीयगृहात् वा कश्चित् अज्ञातनामा (गौरसिंहः) गुरुसेवनपटुः आचार्यस्य सेवायाम् एकनिष्ठः विप्रवटुः ब्राह्मणस्य पुत्रः निश्चक्राम निर्गतवान्।

व्याख्यानम् - अत्र सूर्यस्य वर्णना क्रियते। तस्य सूर्यस्य प्रकाशः लोहितवर्णयुक्तः रक्ताभसहितः। अयं सूर्यः आकाशस्थानां नक्षत्रानां रत्नतुल्यः। पक्षिसमुदायस्य राजा सः सूर्यः। पूर्वदिग्भागस्य सः कर्णाभिरणरूपः। पूर्वदिशः सः अलङ्कारः इत्यर्थः। ब्रह्माण्डस्य सः प्रदीपतुल्यः। सः स्वस्य आलोकेन पृथिव्याः सर्वम् आलोकयति। कमलवृन्दानि सूर्यस्य आलोकेन एव फुल्लन्ति। रात्रौ चक्रवाकविहगस्य स्वप्रियया सह वियोगः भवति। प्रातः पुनः सूर्यस्य आगमने तयोः मेलनं भवति। तस्मात् तयोः वियोगे यत् दुःखं जायते तस्य अयं सूर्यः नाशकः। मधुकराः मधूनाम् आहरणं कृत्वा जीवन्ति। ते पुष्पात् एव मधु स्वीकुर्वन्ति। सूर्यस्य उदये पुष्पानि विकसन्ति। तस्मात् मधुकरसमुदायस्य सूर्यः आधारभुतः। सर्वविधं शुभकार्यं दिवसे एव अनुष्ठीयन्ते। तस्मात् सूर्यःएव सकलकार्याणां प्रवर्तकः। सूर्यः उदेति चेदेव खलु दिवसः इति कथ्यते। तस्मात् दिवसस्य स्वामी सः सूर्यः। सूर्यस्य प्रभावेण दिवसः रात्रिः च भवति। भास्करस्य गत्या एव वर्षस्य गणना विधीयते। तस्यैव प्रभावेण षट् ऋतवः प्रकृतौ दृश्यन्ते। उत्तरायनं दक्षिणायनं च अस्य एव विधीयते। सूर्यः एव सत्ययुगस्य त्रेतायुगस्य द्वापरयुगस्य कलियुगस्य च सम्पादकः। द्विसहस्रदेवयुगात्मकः कालभेदः (२०० वत्सरात्मकः देवयुगः = १ कल्पयुगः) कल्पः इति उच्यते। तस्य अपि परिचालकः सूर्यः एव। ब्रह्मणः परार्द्धपर्यन्तं संख्यागणना सूर्यम् आश्रित्य एव भवति। अयं सूर्यः एव जगत् पुनः पुनः सृजति पालयति नाशयति च। ऋग्वेदः यजुर्वेदः सामवेदः अथर्ववेदः एते चत्वारः वेदाः। वेदाः सूर्यम् एव आधिक्येन स्तौति। गायत्रीमन्त्रस्य देवता सूर्यः एव। ब्रह्मणाः प्रत्यहं सूर्यस्य उपासनां कुर्वन्ति। सूर्यवंशस्य अयम् आदिपुरुषः। इत्थं भास्करं प्रणम्य एकः गुरुसेवानिष्ठः ब्राह्मणपुत्रः स्वस्य पर्णकुटिरात् बहिः आगतवान्।

व्याकरणविमर्शः

- मरीचिमालिनः - मरीचीनां माला मरीचिमाला इति षष्ठीतत्पुरुषसमासः। मरीचिमाला अस्य अस्तीति मरीचिमाली इति “अत इनिठनौ” इत्यनेन इनिप्रत्ययः।
- खेचरचक्रस्य – खे चरन्ति ये ते खेचराः विहगाः इत्यर्थः। तेषां खेचराणां चक्रं खेचरचक्रम्, तस्य इति षष्ठीतत्पुरुषसमासः।
- ब्रह्माण्डभाण्डस्य – ब्रह्माण्डमेव भाण्डं ब्रह्माण्डभाण्डम्, तस्य इति कर्मधारयसमासः।
- पुण्डरीकपटलस्य – पुण्डरीकाणां पटलं पुण्डरीकपटलम्, तस्य इति षष्ठीतत्पुरुषसमासः।
- रोलम्बकदम्बस्य – रोलम्बानां कदम्बः रोलम्बकदम्बः, तस्य इति षष्ठीतत्पुरुषसमासः।
- निजपर्णकुटीरात् - पर्णानां कुटीरः पर्णकुटीरः। निजस्य पर्णकुटीरः निजपर्णकुटीरः, तस्मात् निजपर्णकुटीरात् इत्युभयत्र षष्ठीतत्पुरुषसमासः।
- विप्रवटुः विप्रश्चासौ वटुः इति कर्मधारयसमासः। ब्राह्मणबालकः इत्यर्थः।
- जनयति - जन्धातोः णिचि लटि तिपि जनयतीति रूपम्। अत्र “बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः” इत्यनेन परस्मैपदम्।

- चर्कर्ति - डुकृञ् करणे इति धातोः यङ्लुकि लटि तिपि चर्कर्ति इति रूपम्।
- कुटीरः – ह्रस्वा कुटी इत्यर्थे "कुटीशमीशूण्डाभ्यो रः" इत्यनेन रप्रत्यये कुटीरशब्दो निष्पन्नः।
- उपतिष्ठन्ते - उपपूर्वकात् स्थाधातोः लटि "उपाद्देवपूजासङ्गतिकरणमित्रकरणपथिष्वति वक्तव्यम्" इत्यनेन आत्मनपदे प्रथमबहुवचने झप्रत्यये उपतिष्ठन्ते इति रूपम्।

पाठगतप्रश्नाः–२

६. कस्य प्रकाशः पूर्वस्यां दिशि।

७. सूर्यः आकाशमण्डलस्य कः।

८. सूर्यः कस्य चक्रवर्ती।

९. ब्रह्माण्डभाण्डस्य कः।

१०. सूर्यः कस्य शोकविमोकः।

११. अयं वत्सरं केषु भागेषु विभनक्ति।

१२. उपतिष्ठन्ते इत्यत्र आत्मनेपदं कथम्।

१३. जनयति इत्यत्र परस्मैपदं कथम्।

१४. सूर्यः कस्य कुलमूलम्।

१.४) साम्प्रतं मूलपाठमवगच्छाम – ३

"अहो चिररात्राय प्रसुप्तोऽहम्, स्वप्नजालपरतन्त्रेणैव महान् पुण्यमयः समयोऽतिवाहितः, सन्ध्योपासनसमयोऽयमस्मद्गुरुचरणानाम्, तत् सपदि अवचिनोमि कुसुमानि।" इति चिन्तयन् कदलीदलमेकमाकुञ्च्य, तृणशकलैः सन्धाय, पुटकं विधाय, पुष्पावचयं कर्तुमारेभे।

वटुरसौ आकृत्या सुन्दरः, वर्णेन गौरः, जटाभिर्ब्रह्मचारी, वयसा षोडशवर्षदेशीयः, कम्बुकण्ठः, आयतललाटः, सुबाहुर्विशाललोचनश्चासीत्।

अन्वयार्थः - "अहो सविस्मयं चिररात्राय चिरकालं यावत् अहं वटुः प्रसुप्तः शयितः। स्वप्नजालपरतन्त्रेण निद्रानायासवशीभूतेन एव महान् पुण्यमयः अत्यन्तपुण्यवान् समयः कालः अतिवाहितः अतीतः। अस्मद्गुरुचरणानां मदीयाचार्यपादानाम् अयम् एष सन्ध्योपासनसमयः सन्ध्यासम्पादनकालः। तत् तस्मात् सपदि शीघ्रम् कुसुमानि पुष्पाणि अवचिनोमि सङ्कलयामि।" इति चिन्तयन् विचारयन् एकम् कदलीदलम् रम्भापर्णम् आकुञ्च्य आच्छिद्य तृणशकलैः बालतृणैः सन्धाय

संयोज्य, पुटकं कुसुमस्थापनपात्रं विधाय सम्पाद्य, पुष्पावचयं कुसमचयनं कर्तुं विधातुम् आरेभे आरब्धवान्।

असौ वटुः ब्रह्मचारी आकृत्या आकारेण सुन्दरः मनोरमः, वर्णेन रङ्गेण गौरः धवलः, जटाभिः ब्रह्मचारी वटुः, वयसा षोडशवर्षदेशीयः षोडशवयस्कल्पः, कम्बुकण्ठः शङ्खग्रीवः, आयतललाटः दीर्घभालः, सुबाहुः शोभनपाणिः विशाललोचनः दीर्घायितनयनः च आसीत् अभवत्।

व्याख्यानम् - ततः स वटुः अचिन्तयत् यत् स बहुकालं शयितः। तेन हि पुण्यमयः कालः निद्रापरतन्त्रतया यापितः। इदानीं तस्य गुरुचरणानां सन्ध्योपासनासमयः। अतः स सत्वरं कुसुमानि अवचेतुं एकम् कदलीपर्णम् आच्छिद्य तत्र बालतृणसन्धानेन कुसुमस्थापनपात्रं निर्माय पुष्पाणि चेतुम् आरब्धवान्।

स वटुः मनोरमकायः धवलवर्णीयः जटाभिः ब्रह्मचारी षोडशवयस्कः शङ्खग्रीवः दीर्घभालः सुन्दरबाहूपेतः विस्तृतलोचनः च आसीत्।

व्याकरणविमर्शः

- स्वप्नजालपरतन्त्रेण – स्वप्न एव जालं स्वप्नजालमिति कर्मधारयसमासः। तस्य परतन्त्रेण स्वप्नजालपरतन्त्रेण इति षष्ठीतत्पुरुषसमासः।
- कदलीदलम् – कदल्याः दलं कदलीदलम् इति षष्ठीतत्पुरुषसमासः।
- तृणशकलैः - तृणानां शकलैः तृणशकलैः इति षष्ठीतत्पुरुषसमासः।
- पुष्पावचयम् - पुष्पाणाम् अवचयः पुष्पावचयः, तं पुष्पावचयम् इति षष्ठीतत्पुरुषसमासः।
- कम्बुकण्ठः - कम्बुरिव कण्ठो यस्य स कम्बुकण्ठः इति बहुब्रीहिः।
- आयतललाटः - आयतं ललाटं यस्य स आयतललाट इति बहुव्रीहिः।
- विशाललोचनः - विशाले लोचने यस्य स विशाललोचनः इति बहुव्रीहिसमासः।
- षोडशवर्षदेशीयः - षोडशवर्षशब्दाद् "ईषदसमाप्तौ कल्पब्देश्य-देशीयरः" इत्यनेन सूत्रेण देशीयर्-प्रत्यये षोडशवर्षदेशीयः इति रूपम्।

कोषः

- "शङ्खः स्यात्कम्बुरस्त्रियाम्" इत्यमरः।
- "ललाटमलिकं गोधिः" इत्यमरः।
- "लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी" इत्यमरः।

पाठगतप्रश्नाः – ३

१५. गौरवटुना महान् पुण्यमयः समयः कथम् अतिवाहितः।

१६. कस्येदानीं सन्ध्योपासनसमयः।

१७. किमर्थः गौरवटुः पुष्पाणि अवचिनोति।

१८. गौरवटुः कीदृशः।

९.५) साम्प्रतं मूलपाठमवगच्छाम – ४

कदलीदलकुञ्जायितस्य एतत्कुटीरस्य समन्तात् पुष्पवाटिका, पूर्वतः परम–पवित्र–पानीयं परस्सहस्र–पुण्डरीक–पटल–परिलसितं पतत्रिकुल–कूजितपूजितं पयःपूरितं सर आसीत्। दक्षिणतश्चैको निर्झर–झर्झर–ध्वनित–दिगन्तरः, फल–पटलाऽऽस्वाद–चपलित–चञ्चु–पतङ्गकुलाऽऽ–क्रमणाधिक–विनत–शाख–शाखि समूह–व्याप्तः सुन्दरकन्दरः पर्वतखण्ड आसीत्।

अन्वयार्थः - कदलीदलकुञ्जायितस्य रम्भापलाशोद्यानीभूतस्य, एतत्कुटीरस्य समीपतरवर्तिपर्णोटजस्य, समन्तात् परितः, पुष्पवाटिका कुसुमोद्यानम्, पूर्वतः प्राच्यां, परमपवित्रपानीयम् अत्यन्तपूतजलं, परःसहस्रपुण्डरीकपटलपरिलसितं सहस्राधिकश्वेतकमलसमूहोपशोभितं, पतत्रिकुलकूजितपूजितं विहगनिवहरवराजितं, पयःपूरितम् अम्भोभरितं, सरः कासारः, आसीत् अविद्यत। दक्षिणतः दक्षिणस्यां दिशि च एकः निर्झरझर्झरध्वनिध्वनितदिगन्तरः वारिप्रवाहझर्झरनादनिनादितदिगन्तरालः, फलपटलास्वादलपलितचञ्चुपतङ्गकूलाक्रमणाधिकविनतशाखशाखिसमूहव्याप्तः फल–समूहभक्षणचञ्चलमुखभाग–पतगनिवहाक्रमणातीवनम्रीभूतशाख–वृक्षसकलसमावृतः, सुन्दरकन्दरः शोभनदरः पर्वतखण्डः शिलाभाग आसीत् अवर्तत।

व्याख्यानम् - गौरसिंहो यस्मिन् कुटिरे न्यवसत् तस्य चतुर्षु दिग्भागेषु परिवृत्य रम्भापादपाः वर्तन्ते स्म। तेन तत् कुटीरं कुञ्जायते स्म। परितश्च आसन् पुष्पोद्यानानि। अस्य पूर्वतो वर्तते जलसम्पूरितः सरोवरो यत्र पवित्रासु अप्सु सहस्रशः श्वेताब्जानि शोभन्ते स्म। अपि च, पक्षिभिराकुलितः स तेषां कलरवैः सर्वदा मुखरितोऽवर्तत। दक्षिणत आसीद् एकः पर्वतखण्डो यस्य वृक्षा आसन् विहगकुलकुलायभूताः। रम्यैः कन्दरैः सुशोभितात् तस्मात् पर्वतखण्डात् प्रच्यवन्त्याः निर्झरिण्या झर्झरध्वनिना चतुर्दिशो ध्वनिता अभूवन्।

व्याकरणविमर्शः

- कदलीदलकुञ्जायितस्य - कदलीनां दलानि कदलीदलानि इति षष्ठीतत्पुरुषसमासः, तैः कुञ्जायित इति तृतीयातत्पुरुषसमासः, तस्य।
- परमपवित्रपानीयं - परमं च तत् पवित्रं चेति कर्मधारयः, तादृशं पानीयं यस्य तत् इति

बहुव्रीहिसमासः।

- परस्सहस्रपुण्डरीकपटलपरिलसितम् - परस्सहस्राणि इति निपातनात् समासः। "पारस्करप्रभृतीनि च संज्ञायाम्" इति सुडागमः। परस्सहस्राणि पुण्डरीकाणि इति कर्मधारयसमासः। तेषां पटलमिति षष्ठीतत्पुरुषसमासः। तेन परिलसितमिति तृतीयातत्पुरुषसमासः।
- पतत्रिकुलकूजितपूजितम् - पतत्रिणां कुलं पतत्रिकुलमिति षष्ठीतत्पुरुषसमासः। तस्य कूजितमिति षष्ठीतत्पुरुषसमासः। तेन पूजितमिति तृतीयातत्पुरुषसमासः।
- पयःपूरितं - पयसा पूरितम् इति तृतीयातत्पुरुषसमासः।
- निर्झरझर्झरध्वनिध्वनितदिगन्तरः - झर्झररूपः ध्वनिः झर्झरध्वनिः शाकपार्थिवादिवत् समासः। निर्झराणां झर्झरध्वनिरिति षष्ठीतत्पुरुषसमासः। तेन ध्वनितानि इति तृतीयातत्पुरुषसमासः। तादृशानि दिगन्तराणि यस्य स इति बहुव्रीहिसमासः।
- फलपटलाऽऽस्वादचपलितचञ्चुपतङ्गकुलाऽऽक्रमणाधिकविनत-शाशशाखिसमूहव्याप्तः - फलानां पटलं फलपटलमिति षष्ठीतत्पुरुषः। तस्य आस्वादः फलपटलास्वादः इति षष्ठी-तत्पुरुषः। तेन चपलिताः फलपटलास्वादचपलिताः इति तृतीया-तत्पुरुषः। तादृशाः चञ्चवः येषां ते फलपटलास्वादचपलितचञ्चवः इति बहुव्रीहिः। तादृशाः पतङ्गा इति कर्मधारयसमासः। तेषां कुलमिति षष्ठीतत्पुरुषः। तस्य आक्रमणम् इति षष्ठीतत्पुरुषः। तेन आक्रमणेन अधिकविनताः इति तृतीयातत्पुरुषः। अधिकविनताः शाखाः येषां ते अधिकविनताशाखा इति बहुव्रीहिः। तादृशाः शाखिनः इति कर्मधारयः। तेषां समूह इति षष्ठीतत्पुरुषः। तेन व्याप्त इति तृतीयातत्पुरुषः।
- सुन्दरकन्दरः - सुन्दराः कन्दराः यस्मिन् स इति बहुव्रीहिसमासः।

कोषः

- "कदली वाणरबुसा रम्भा मोचांशुमत्फला" इत्यमरः।
- "स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम्" इत्यमरः।
- "वृक्षो महीरुहः शाखी विटपी पादपस्तरुः" इत्यमरः।
- "दरी तु कन्दरो वा स्त्री" इत्यमरः।

पाठगतप्रश्नाः–४

१९. कुटीरं कीदृशम्।

२०. कुटीरस्य समन्तात् किमासीत्।

२१. कुटीरस्य पूर्वतः कीदृशं सर आसीत्।

२२. कुटीरस्य दक्षिण्यस्यां दिशि किमासीत्।

२३. निर्झरझर्झरध्वनिध्वनितदिगन्तरः इत्यत्र समासः लेख्यः।

२४. परमपवित्रपानीयम् इत्यत्र समासः लेख्यः।

१.६) साम्प्रतं मूलपाठमवगच्छाम – ५

यावदेष ब्रह्मचारी वटुरलिपुञ्जमुद्धूय कुसुमकोरकानवचिनोति, तावत् तस्यैव सतीर्थ्योऽपरस्तत्समानवयाः कस्तूरिका-रेणुरूषित इव श्यामः, चन्दनचर्चित-भालः कर्पूरागुरु-क्षोदच्छुरित-वक्षो-बाहु-दण्डः, सुगन्धपटलै-रुन्निद्रयन्निव निद्रामन्थराणि कोरकनिकुरम्बकान्तरालसुप्तानि मिलिन्दवृन्दानि झटिति समुपसृत्य निवारयन् गौरवटुमेवमवादीत्-

'अलं भो अलम्! मयैव पूर्वमवचितानि कुसुमानि, त्वं तु चिरं रात्रावजागरीरिति क्षिप्रं नोत्थापितः, गुरुचरणा अत्र तडागतटे सन्ध्यामुपासन्ते, संस्थापिता मया निखिला सामग्री तेषां समीपे। यां च सप्तवर्षकल्पाम्, यवनत्रासेन निःशब्दं रुदतीम्, परमसुन्दरीम्, कलितमानवदेहामिव सरस्वतीं सान्त्वयन्, मरन्दमधुरा अपः पाययन्, कन्दखण्डानि भोजयन्, त्वं त्रियामाया यामत्रयमनैषीः, सेयमधुना स्वपिति, उद्बुद्ध्य च पुनस्तथैव रोदिष्यति, तत्परिमार्गणीयान्येतस्याः पितरौ गृहं च-'

इति संश्रुत्य उष्णं निःश्वस्य यावत् सोपि किञ्चिद् वक्तुमियेष तावदकस्मात् पर्वतशिखरे निपपात तयोर्दृष्टिः।

अन्वयार्थः - यावत् यावत्कालपर्यन्तम् एष पूर्ववर्णितः ब्रह्मचारी वटुः ब्रह्मव्रती अलिपुञ्जं भ्रमरकुलम् उद्धूय निवार्य कुसुमकोरकान् पुष्पकुड्मलान् अवचिनोति चिनोति, तावत् तस्मिन्नेव काले तस्य एव वटोः एव सतीर्थ्यः सहाध्येता अपरः अन्यः तत्समानवयाः तत्समवर्षीयः, कस्तूरिकारेणुरुषितः मृगनाभिचूर्णच्छुरितः इव श्यामः श्यामवर्णीयः, चन्दनचर्चितभालः चन्दनलिप्तललाटः, कर्पूरागुरु-क्षोदच्छुरित-वक्षो-बाहु-दण्डः कपूरागुरुचूर्णलिप्तवक्षःस्थलभुजदण्डः, सुगन्धपटलैः सौरभसमूहैः उन्निद्रयन् जागरयन् इव निद्रामन्थराणि तन्द्राशिथिलानि कोरकनिकुरम्बकान्तरालसुप्तानि कलिकासमूहान्तरनिद्रागतानि मिलिन्दवृन्दानि मधुकरकुलानि झटिति शीघ्रं समुपसृत्य समागत्य निवारयन् ताडयन् गौरवटुं शुक्लवर्णीयं ब्रह्मचारिणम् अवादीत् अकथयत्-

"अलं भो अलम्! भो मित्र पुष्पचयनेन प्रयोजनं नास्ति, मया एव पूर्वम् आदौ कुसुमानि प्रसूनानि अवचितानि सङ्कलितानि, त्वं तु गौरवटुः तु चिरं बहुसमयं रात्रौ यामिन्याम् अजागरीः जागरितवान् इति अस्मात् कारणात् क्षिप्रं शीघ्रं न उत्थापितः न जागरितः। गुरुचरणाः आचार्यपादाः अत्र अस्मिन् स्थाने तडागतटे पुष्करिण्याः तीरे सन्ध्यां प्रातःकालीनाम् पूजाम् उपासन्ते विदधति। तेषां गुरुवर्याणां समीपे निकटे मया श्यामवटुना निखिला सामग्री समस्तानि सन्ध्योपासनसहायकानि द्रव्याणि संस्थापिता समुपकल्पितानि। यां पूर्वदृष्टां च पुनः सप्तवर्षकल्पां प्रायः सप्तवर्षीयां यवनत्रासेन यवनभयेन निःशब्दं शब्दरहिततया रुदतीं क्रन्दन्तीं परमसुन्दरीम् अतिशयकमनीयां कलितमानवदेहाम् धृतनरमूर्तिम्

सरस्वतीम् इव शारदाम् इव सान्त्वयन् समाश्वसयन्, मरन्दमधुराः पुष्परसोपेतानि अपः जलानि पाययन् गलविवरं प्रवेशयन्, कन्दखण्डानि मुनिभोज्यविशेषभागान् भोजयन् खादयन् त्वं गौरवटुः त्रियामाया यामिन्याः यामत्रयं प्रहरत्रयम् अनैषीः यापितवान् असि, सा इयं सा कन्यका अधुना इदानीं स्वपिति निद्रां यापयति। उद्बुद्ध्य उत्थाय च पुनः तथैव पूर्ववत् रोदिष्यति क्रन्दिष्यति, तत् तस्माद् हेतोः एतस्याः कन्यकायाः पितरौ मातापितरौ गृहं च भवनं च परिमार्गणीयानि अन्वेषणीयानि"

इति एवं संश्रुत्य श्रुत्वा उष्णं बलात् निःश्वस्य निःश्वसनं सम्पाद्य यावत् यावत्कालं स गौरवटुः अपि किञ्चिद् वक्तुं कथयितुम् इयेष वाञ्छति स्म तावद् तदैव अकस्मात् हठात् पर्वतशिखरे गिरिशृङ्गे तयोः गौरवटु–श्यामवट्वोः दृष्टिः दर्शनं निपपात अपतत्।

व्याख्यानम् - यदा गौरवटुः भ्रमरकुलं निवार्य कुसुमानि अवचिनोति स्म तदा तस्य सहाध्येता तत्समानवयस्कः श्यामवटुः आगतः। श्यामवटुः दर्शनेन अतीव श्यामलः। तस्य भालदेशः चन्दनचर्चितः, वक्षःस्थलं कपूरागुरुचूर्णलिप्तम् आसीत्। स शीघ्रमागत्य कुसुमाभ्यन्तरे निद्रात उत्थितानि मधुकरवृन्दानि समागत्य निवारयन् गौरवटुं कथितवान् यत् पुष्पचयनेन प्रयोजनं नास्ति। तेन पूर्वम् एव कुसुमानि चितानि। गौरवटुः तु रात्रौ बहुसमयं जागरित आसीत् अतः प्रातः स न उत्थापितः। गुरुचरणाः तडागतटे सन्ध्यांवन्दनं कुर्वन्ति। तेषां सन्ध्योपासनसहायकानि द्रव्याणि श्यामवटुना संस्थापितानि। ततः स कथितवान् यद् यां सप्तवर्षकल्पां यवनभयेन क्रन्दन्तीं सान्त्वयन् त्वं अपः पाययन् मुनिभोज्यं भक्षयन् रात्रौ त्रीन् प्रहरान् यापितवान् सा कन्यका साम्प्रतं निद्राति। तस्याः रोदनं यथा न स्यादतः तस्या पितरौ गृहं च भवनं च अन्वेष्टव्यम् इति। एवं श्रुत्वा गौरवटुः यदा किञ्चिद्वक्तुम् उद्यतः तदा द्वयोः हठात् पर्वतशृङ्गे दृष्टिपातः अभवत्।

व्याकरणविमर्शः

- कुसुमकोरकान् - कुसुमानां कोरकाः कुसुमकोरकाः, तान् इति षष्ठीतत्पुरुषः।
- तत्समानवयाः - तस्य समानः तत्समानः इति षष्ठीतत्पुरुषः। तत्समानं वयः यस्य स इति बहुव्रीहिसमासः।
- कस्तूरिकारेणुरूषितः - कस्तूरिकाणां रेणवः कस्तूरिकारेणवः इति षष्ठीतत्पुरुषः। तैः रूषितः इति तृतीयातत्पुरुषः।
- चन्दनचर्चितभालः - चन्दनेन चर्चितं चन्दनचर्चितमिति तृतीयातत्पुरुषः। चन्दनचर्चितं भालं यस्य स इति बहुव्रीहिः।
- कर्पूरागुरुक्षोदच्छुरितवक्षोबाहुदण्डः - कर्पूरमिश्रितः अगुरुः कर्पूरागुरुः इति शाकपार्थिवादिवत्समासः। तस्य क्षोदः इति षष्ठीतत्पुरुषः। तेन छुरितम् इति तृतीयातत्पुरुषः। कर्पूरागुरुक्षोदच्छुरितं वक्षोबाहुदण्डं यस्य स कर्पूरागुरुक्षोदच्छुरित-वक्षोबाहुदण्डः इति बहुव्रीहिः। वक्षश्च बाहुदण्डौ च वक्षबाहुदण्डमिति समाहारद्वन्द्वः।
- मिलिन्दवृन्दानि - मिलिन्दानां वृन्दानि इति षष्ठीतत्पुरुषः।
- तडागतटे - तडागस्य तटः तडागतटः, तस्मिन्निति षष्ठीतत्पुरुषः।

- यवनत्रासेन – यवनेभ्यः त्रासेन यवनत्रासेनेति पञ्चमीतत्पुरुषः।
- कलितमानवदेहाम् - मानवानां देहः मानवदेहः इति षष्ठीतत्पुरुषः। कलितो मानवदेहः यया सा, ताम् इति बहुव्रीहिः।
- समुपसृत्य - समुपसंघातपूर्वकात् सृधातोः ल्यपि समुपसृत्य इति।
- निवारयन् - निपूर्वकाद् वारिधातोः शतरि पुंसि सौ निवारयन् इति।
- अवादीत् - वदेर्लुङि तिपि अवादीत् इति।
- अवचितानि - अवपूर्वकात् चिनोतेः कर्मणि क्तप्रत्यये नपुंसके जसि रूपम्।
- अजागरीः - जागर्तेः लुङि सिपि अजागरीः इति रूपम्।
- उत्थापितः - उत्पूर्वकात् स्थाधातोः णिचि कर्मणि क्तप्रत्यये पुंसि सौ उत्थापितः इति रूपम्।
- सान्त्वयन् - सान्त्व्-धातोः शतरि पुंसि सुप्रत्यये सान्त्वयन् इति।

कोषः

- "स्यान्निकायः पुञ्जराशिः" इत्यमरः।
- "सतीर्थ्यास्त्वेकगुरवः" इत्यमरः।
- "कूलं रोधश्च तीरञ्च प्रतीरञ्च तटं त्रिषु" इत्यमरः।

पाठगतप्रश्नाः – ५

२५. श्यामवटुः कीदृश आसीत्।
२६. आचार्यपादाः कुत्र सन्ध्यावन्दनं कुर्वन्ति स्म।
२७. श्यामवटुना का संस्थापिता।
२८. गौरवटुः कथं प्रहारत्रयं जागरितवान्।
२९. गौरवटुः किं पाययन् स्थितः।
३०. सा बाला कथं रोदिति स्म।
३१. गौरवटुना श्यामवटुना च कानि परिमार्गणीयानि।
३२. कुत्र गौरवटोः श्यामवटोश्च दृष्टिः पतिता।

१.७) साम्प्रतं मूलपाठमवगच्छाम – ६

तस्मिन् पर्वते आसीदेको महान् कन्दरः। तस्मिन्नेव महामुनिरेकः समाधौ तिष्ठति स्म। कदा स समाधिमङ्गीकृतवानिति कोऽपि न वेत्ति। ग्रामणी-ग्रामीण-ग्रामाः समागत्य मध्ये मध्ये तं

पूजयन्ति, प्रणमन्ति स्तुवन्ति च। तं केचित् कपिल इति, अपरे लोमश इति, इतरे जैगीषव्य इति अन्ये च मार्कण्डेय इति, विश्वसन्ति स्म। स एवायमधुना शिखरादवतरन् ब्रह्मचारिवटुभ्यामदर्शि।

अन्वयार्थः - तस्मिन् पूर्वोक्ते पर्वते गिरौ एकः महान् विशालं कन्दरः गह्वरम् आसीत् अभवत्। तस्मिन् एव तस्मिन् गह्वरे एव एकः महामुनिः महर्षिः समाधौ चित्तवृत्तिनिरोधाख्ये योगे तिष्ठति स्म वर्तते स्म। कदा कस्मिन् समये स महामुनिः समाधिं योगम् अङ्गीकृतवान् स्वीकृतवान् इति न कोऽपि वेत्ति जानाति। ग्रामणी–ग्रामीण–ग्रामाः ग्रामाधिप–ग्रामवासिनां निवहाः समागत्य समुपेत्य मध्ये मध्ये अन्तरा अन्तरा तं समाधिस्थं मुनिपुङ्गवं पूजयन्ति वरीवस्यन्ति, प्रणमन्ति नमस्कुर्वन्ति स्तुवन्ति स्तुतिं कुर्वन्ति च। तं योगिराजं केचित् केचन जनाः कपिलः सिद्धाग्रगण्यः कपिलाख्यो मुनिः इति एवं प्रकारेण, अपरे अन्ये लोमशः तदाख्यो मुनिः इति, इतरे अपरे जैगीषव्यः तदाख्यो मुनिः इति, अन्ये इतरे च मार्कण्डेय एतन्नामा मुनिः इति विश्वसन्ति स्म विश्वासं कुर्वन्ति स्म। स एव तादृशः महामुनिरेव अयम् एषः अधुना सम्प्रति शिखरात् अचलशृङ्गात् अवतरन् नीचैरागच्छन् ब्रह्मचारिवटुभ्याम् वेदाध्यायिभ्यां गौरश्यामवटुभ्याम् अदर्शि दृष्टः।

व्याख्यानम् - युगयुगान्तराणि तस्य पर्वतस्य कन्दरे एकः योगिराजः मुनिप्रवरः समाधिमग्नो वर्तते। तस्य प्रकृतं स्वरूपं न कोऽपि वेत्ति। केचित्तं कपिलं, केचित् जैगीषव्यं, इतरे लोमशं केदिद्वा तं मार्कण्डेयं जानन्ति विश्वसन्ति च। कपिलो हि सिद्धानाम् अग्रगण्यः सांख्यशास्त्रस्य प्रवक्ता मुनिसत्तमः। स हि वस्तुतः श्रीविष्णोरंशावतारः "सिद्धानां कपिलो मुनिरि"ति भगवद्वचनात्। जैगीषव्यः महाभारतोक्तः प्रख्यातः सिद्धमहर्षिः। योगबलेन आत्तशक्तिः स युगपत् सर्वलोकचारी अभवत्। लोमशः महाभारतवर्णितो मुनिविशेषो यो बहुशः पृथिव्याः प्रदक्षिणं कृतवान्। भगवता व्यासेन आदिष्टः सन् स वनवासकाले पाण्डवान् तीर्थस्थानानि नैकानि अदर्शयत्। मृकण्डमुनेरपत्यं मार्कण्डेयो भगवतः शिवस्याराधनां कृत्वा तत्प्रसादात् चिरजीवी बभूव। ग्रामपतयः तथा सर्वाः ग्राम्यप्रजाः समागम्य मध्ये मध्ये तस्मै पूजाप्रणामादिकं निवेदयन्ति स्म। किन्तु योगिराजस्य समाधिर्न भग्नः। चित्तवृत्तिनिरोधो हि योगः। योगस्य चरमावस्था हि समाधिः। समाधिर्नाम ध्यानावस्थाविशेषो यत्र तत्त्वसाक्षात्कारो भवति। तत्र बाह्यं रूपादिकं न प्रतीयते। बाह्यं किमपि वृत्तं निरुद्धचित्तं योगिनं न स्पृशति। अत एव पूजादिना स योगी न समाधित उत्थितः। स योगिराज इदानीं पर्वताद् अवतरति इति गौरवटुः श्यामवटुश्च दृष्टवान्।

व्याकरणविमर्शः

- महामुनिः – महान् चासौ मुनिः महामुनिः इति कर्मधारयसमासः।
- ग्रामणीग्रामीणग्रामाः - ग्रामण्यश्च ग्रामीणाश्च ग्रामणीग्रामीणाः इतरेतरद्वन्द्वसमासः। तेषां ग्रामाः ग्रामणीग्रामीणग्रामाः इति षष्ठीतत्पुरुषसमासः।
- अदर्शि - दृश्धातोः कर्मणि लुङि प्रथमपुरुषैकवचने रूपम्।
- अवतरन् - अवपूर्वात् तृधातोः शतरि सौ रूपमिदम्।

कोषः

- "समौ संवसथ-ग्रामौ" इत्यमरः।
- "दरी तु कन्दरो वा स्त्री देवखातबिले गुहा। गह्वरम्" इत्यमरः।

पाठगतप्रश्नाः – ६

३३. तस्य पर्वतस्य कन्दरे कः निवसति स्म।

३४. महामुनिं के पूजयन्ति स्म।

३५. महामुनिं कीदृशं विश्वसन्ति स्म।

३६. कं पर्वतशिखराद् अवतरितुं दृष्टवान् गौरवटुः श्यामवटुः च।

१.८) साम्प्रतं मूलपाठमवगच्छाम – ७

'अहो! प्रबुद्धो मुनिः! प्रबुद्धो मुनिः! इत एवागच्छति, इत एवागच्छति, सत्कार्योऽयं सत्कार्योऽयम्' इति तौ सम्भ्रन्तौ बभूवतुः।

अथ समापितसन्ध्यावन्दनादिक्रिये समायाते गुरौ, तदाज्ञया नित्यनियमसम्पादनाय प्रयाते गौरवटौ, छात्रगणसहकारेण प्रस्तुतासु च स्वागतसामग्रीषु, 'इत आगम्यताम्, सनाथ्यतामेष आश्रमः' इति सप्रणाममभिगम्य वदत्सु निखिलेषु , योगिराज आगत्य तन्निर्दिष्टकाष्ठपीठं भास्वानिवोदयगिरिमारुरोह, उपाविशच्च।

तस्मिन् पूज्यमाने, 'योगिराडुत्थित' इति, आयात इति च आकर्ण्य, कर्णपरम्परया बहवो जनाः परितः स्थिताः। सुघटितं शरीरम्, सान्द्रां जटाम्, विशालान्यङ्गानि, अङ्गारप्रतिमे नयने, मधुरां गम्भीराञ्च वाचं वर्णयन्तश्चकिता इव सञ्जाताः।

अन्वयार्थः - 'अहो! प्रबुद्धो मुनिः! प्रबुद्धो मुनिः! साश्चर्यं समाधित उत्थितो मुनिः, इतः अस्मदाश्रमाभिमुखम् एव आगच्छति आयाति, इत अस्मदाश्रमाभिमुखम् एव आगच्छति आयाति, अयं योगिराजः सत्कारयोग्यः अयं सत्कार्यः सत्कारार्हः' इति तौ गौरवटुश्यामवटू सम्भ्रन्तौ हर्षान्वितौ बभूवतुः अभवताम्।

अथ ततः परं समापितसन्ध्यावन्दनादिक्रिये विहितसन्ध्यावन्दनादिकर्मके समायाते समागते गुरौ आचार्ये, तदाज्ञया गुरोराज्ञया नित्यनियमसम्पादनाय सन्ध्यावन्दनादिनित्यकर्मनिष्पादनाय प्रयाते गते गौरवटौ श्वेतब्रह्मचारिणि, छात्रगणसहकारेण शिष्यसमुदायसाहाय्येन स्वागतसामग्रीषु अभिवादनोपचारद्रव्येषु प्रस्तुतासु सज्जीकृतेषु च, 'इत अत्र आगम्यतां समागम्यताम्, सनाथ्यताम्

अलङ्क्रियताम् एष आश्रमः इदं तपस्विस्थलम्' इति सप्रणामं प्रणामसहितम् अभिगम्य समागत्य वदत्सु भाषमाणेषु निखिलेषु सर्वेषु उपस्थितेषु, योगिराजः मुनिप्रवरः आगत्य एत्य तन्निर्दिष्टकाष्ठपीठं मुनिनिमित्तनिर्दिष्टां दारुनिर्मितचतुष्पादिकां भास्वान् इव दिवाकरः इव उदयगिरिम् उदयाचलम् आरुरोह आरूढवान् उपाविशत् उपविष्टवान् च।

तस्मिन् मुनिप्रवरे पूज्यमाने अर्च्यमाने 'योगिराट् महामुनिः उत्थित समुत्थितः' इति, 'आयातः समागतः' इति च कर्णपरम्परया श्रुतिमार्गेण आकर्ण्य संश्रुत्य बहवो जनाः नैके मानवाः परितः सर्वासु दिक्षु स्थिताः सम्प्राप्ताः। ते सुघटितं शोभनाकारं शरीरं कायम्, सान्द्रां प्रगाढां जटां सटाम्, विशालानि दीर्घायतान् अङ्गानि अवयवान्, अङ्गारप्रतिमे अङ्गारसदृशे नयने नेत्रे, मधुरां मनोहरां गम्भीरां गभीरां च वाचं वाणीं वर्णयन्तः प्रशंसन्तः चकिता विस्मिता इव सञ्जाताः अभवन्।

व्याख्यानम् - प्रबुद्धो मुनिः अतः तस्य सत्कारो विधेयः इति गौरवटुः श्यामवटुः च हर्षान्वितः अभवत्। ततः सन्ध्यावन्दनादिक्रियां सम्पाद्य गुरुचरणाः समागताः। तदाज्ञया गौरवटुः नित्यनियमसम्पत्तये गतः। तदा छात्रगणसहिताः सर्वे स्वागतसामग्रीः सज्जीकृत्य 'अत्र आगम्यताम्, अलङ्क्रियताम् एष आश्रमः' इति सप्रणामं समागत्य वदन्त आसन्। ततः योगिराजः मुनिप्रवरः आगत्य मुनिनिमित्तनिर्दिष्टां दारुनिर्मितचतुष्पादिकां भास्वान् इव दिवाकरः इव उदयगिरिम् उदयाचलम् आरुह्य उपविष्टवान्।

तस्य मुनिप्रवरस्य योगिराजस्य पूजनात्परं 'योगिराट् उत्थितः' इति, 'आयातः' इति च वार्ता कर्णपरम्परया श्रुत्वा बहवो जनाः आश्रमम् आगताः। तस्य योगिराजस्य सुघटितः कायः, प्रगाढा जटा, विशालाः च अवयवाः, अङ्गारसदृशे नेत्रे, मनोहरा गम्भीरा च वाणी आसीत्। एतत्सर्वं प्रशंसन्तः जना चकिता अभवन्।

व्याकरणविमर्शः

- समापितसन्ध्यावन्दनादिक्रिये – सन्ध्याया वन्दनम् इति सन्ध्यावन्दनमिति षष्ठीतत्पुरुषः। सन्ध्यावदनम् आदि यासां ताः सन्ध्यावन्दनादयः इति बहुव्रीहिसमासः। ताश्चामी क्रियाश्चेति सन्ध्यावन्दनादिक्रियाः इति कर्मधारयः। समापिताः सन्ध्यावन्दनादिक्रियाः येन स समापितसन्ध्यावन्दनादिक्रियः, तस्मिन् इति बहुव्रीहिः।
- नित्यनियमसम्पादनाय – नित्याः नियमाः नित्यनियमाः इति कर्मधारयः। तेषां सम्पादनाय नित्यनियमसम्पादनाय इति षष्ठीतत्पुरुषः।
- स्वागतसामग्रीषु - स्वागतार्थाः सामग्र्यः स्वागतसामग्र्यः, तासु इति शाकपार्थिवादिवत्समासः।
- आरुरोह – आङ्पूर्वकाद् रुह्धातोः लिटि तिपि आरुरोह इति।
- उपाविशत् - उपपूर्वपूर्वकाद् विशतेः लङि तिपि उपाविशत् इति।

कोषः

- "भास्वद्विवश्वत्सप्ताश्वहरिदश्वोष्णरश्मयः" इत्यमरः।

● "कर्णशब्दग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः" इत्यमरः।

पाठगतप्रश्नाः–८

३७. महामुनिः कुत्र उपाविशत्।

३८. महामुनिः क इव कुत्र आरुरोह।

३९. नित्यनियमसम्पादनाय इत्यत्र समासनिर्णयः कार्यः।

४०. महामुनिः दर्शनेन कीदृश आसीत्।

पाठसारः

सूर्यः आकाशस्थनक्षत्राणां मध्ये मणिरूपः। पूर्वस्यां दिशायां स कुण्डलरूपेण विराजते। स कमलस्य वल्लभः चक्रवाकमिथुनस्य च शोकापहारकः। यतः सूर्यस्य उदयास्तगमनाभ्यां नियम्यते पद्मिनीमां प्रकाशः मालिन्यं च। दिनस्वामी स सूर्यः सर्वव्यवहाराणां प्रवर्तयिता। किं बहुना। सूर्ये उदिते दिनम् अस्तमिते च रात्रिः पृथिव्यां विधीयते। सूर्यगतिकारणाद् एव द्वादशवत्सरस्य भेदाः, ऋतूनां युगानां तथा कल्पानाम् अपि भेदाः भवन्ति। वेदेषु सूर्यदेवः एव स्तूयते। गायत्रीमन्त्रेण सद्विप्राः प्रतिदिनं सूर्यस्य एव उपासनां कुर्वन्ति। तस्यैव कुले भगवान् श्रीरामचन्द्रः जन्म अलभत। अत एव स विश्ववासिनां परमपूजनीयः इत्येवं सूर्यवन्दनं कुर्वन् निजकुटिरात् गौरवटुः बहिरागतः।

विलम्बात् प्रबोधनहेतोः गुरुसेवायां विघ्नम् आशङ्क्य स गुरोः सन्ध्योपासनार्थं पुष्पावचयं कर्तुमुद्यतः। अतः स सत्वरं कुसुमानि अवचेतुं एकम् कदलीपर्णम् आच्छिद्य तत्र बालतृणसन्धानेन कुसुमस्थापनपात्रं निर्माय पुष्पाणि चेतुम् आरब्धवान्। स वटुः मनोरमकायः धवलवर्णीयः जटाभिः ब्रह्मचारी प्रायः षोडशवयस्कः शङ्खग्रीवः दीर्घभालः सुन्दरबाहूपेतः विस्तृतलोचनः च आसीत्।

एतस्मिन् अवसरे तस्यैव कोऽपि सतीर्थः श्यामवटुः आगम्य अवदत् यद् अलं पुष्पचयनेन इति। स श्यामवटुः दर्शनेन अतीव श्यामलः। तस्य भालदेशः चन्दनचर्चितः, वक्षःस्थलं कपूरागुरुचूर्णलिप्तम् आसीत्। स गौरवटुम् उक्तवान् यद् यवनत्रासाद् भीतायाः बालिकायाः सेवया गौरवटोः रात्रौ प्रहरत्रयम् अतीतम्। अतः स प्रातः शीघ्रं न जागरितः। श्यामवटुना गुरोः उपासनसामग्री प्रागेव उपकल्पिता। अधुना तस्याः बालिकायाः पित्रोः गृहस्य च अन्वेषणं विधातव्यमिति। तयोः आलापसमये हठात् तयोः पर्वतशिखरे दृष्टिः पतिता।

तत्र पर्वतस्य कन्दरे बहुसमयं व्याप्य एकः महामुनिः समाधौ मग्न आसीत्। तस्य परिचयः कोऽपि न जानाति स्म। तं मुनिं तत्रत्या ग्रामण्यः ग्रामवासिनश्च पूजयन्ति स्म। स एव मुनिः समाधित उत्थाय

यदा पर्वताद् अवतरन् आसीत् तदा वटुद्वयेन स दृष्टः। स च तपोवनाभिमुखं समागच्छति स्म। ततः तपोवनाध्यक्षेण सच्छात्रेण ब्रह्मचारिगुरुणा स महामुनिः स्वागतवाग्भिः समाहूतः यथाविधि अभ्यर्चितश्च। ततः योगिराजः आगत्य मुनिनिमित्तनिर्दिष्टां दारुनिर्मितचतुष्पादिकां भास्वान् इव दिवाकरः इव उदयगिरिम् उदयाचलम् आरुह्य उपविष्टवान्।

स मुनिः समाधित उत्थितः आश्रमम् आयातः इति च वार्तां कर्णपरम्परया श्रुत्वा बहवो जनाः तं द्रष्टुम् आश्रमम् आगताः। तस्य योगिराजस्य सुघटितः कायः, प्रगाढा जटा, विशालाः च अवयवाः, अङ्गारसदृशे नेत्रे, मनोहरा गम्भीरा च वाणी आसीत्। एतत्सर्वं प्रशंसन्तः जना चकिता अभवन्। एवं समासेन पाठसारः प्रस्तुतः।

पाठान्तप्रश्नाः

१. विष्णोर्माया भगवती यया सम्मोहितं जगत् - इति श्लोकांशं व्याख्यात।

२. हिंस्रः स्वपापेन विहिंसितः - इति श्लोकांशं प्रपूर्य व्याख्यात।

३. शिवराजविजयकाव्यदिशा सूर्योदयं वर्णयत।

४. कदलीदलकुञ्जायितस्य एतत्कुटीरस्य समन्तात् पुष्पवाटिका, पूर्वतः परम-पवित्र-पानीयं परस्सहस्र-पुण्डरीक-पटल-परिलसितं पतत्रिकुल-कूजितपूजितं पयःपूरितं सर आसीत्। दक्षिणतश्चैको निर्झर-झर्झर-ध्वनित-दिगन्तरः, फल-पटलाऽऽस्वाद-चपलित-चञ्चु-पतङ्कुलाऽऽ-क्रमणाधिक-विनत-शाख-शाखि समूह-व्याप्तः सुन्दरकन्दरः पर्वतखण्ड आसीत्। - इति व्याख्यात।

५. तस्मिन् पर्वते आसीदेको महान् कन्दरः। तस्मिन्नेव महामुनिरेकः समाधौ तिष्ठति स्म। कदा स समाधिमङ्गीकृतवानिति कोऽपि न वेत्ति। ग्रामणी-ग्रामीण-ग्रामाः समागत्य मध्ये मध्ये तं पूजयन्ति, प्रणमन्ति स्तुवन्ति च। तं केचित् कपिल इति, अपरे लोमश इति, इतरे जैगीषव्य इति अन्ये च मार्कण्डेय इति, विश्वसन्ति स्म। स एवायमधुना शिखरादवतरन् ब्रह्मचारिवटुभ्यामदर्शि। - इति व्याख्यात।

६. आश्रमे सत्कारपर्यन्तं योगिराजवृत्तान्तं वर्णयत।

पाठगतप्रश्नानामुत्तराणि

उत्तराणि-१

१. भगवत्या विष्णोः मायया सम्मोहितं जगत्।

२. हिंस्रः स्वपापेन विहिंसितो भवति।

३. साधुः समत्वेन भयाद् विमुच्यते।

४. विष्णोर्मायेति कीदृशं नमस्कारात्मकं मङ्गलम्।

५. हिंस्रः इति वस्तुनिर्देशात्मकं मङ्गलम्।

उत्तराणि-२

६. भगवतः मरीचिमालिनः प्रकाशः पूर्वस्यां दिशि।

७. सूर्यः आकाशमण्डलस्य मणिः।

८. सूर्यः खेचरचक्रस्य चक्रवर्ती।

९. ब्रह्माण्डभाण्डस्य दीपकः सूर्यः।

१०. सूर्यः कोकलोकस्य शोकविमोकः।

११. सूर्यः वत्सरं द्वादशसु भागेषु विभनक्ति।

१२. उपतिष्ठन्ते इत्यत्र "उपाद्देवपूजासङ्गतिकरणमित्रकरणपथिष्विति वक्तव्यम्" इति वार्तिकेन आत्मनेपदम्।

१३. जनयति इत्यत्र "बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः" इत्यनेन परस्मैपदम्।

१४. सूर्यः श्रीरामचन्द्रस्य कुलमूलम्।

उत्तराणि-३

१५. गौरवटुना महान् पुण्यमयः समयः स्वप्नजालपरतन्त्रेण एव अतिवाहितः।

१६. गौरवटोः गुरुचरणानां प्रातः सन्ध्योपासनसमयः।

१७. गुरोः सन्ध्योपासनायै गौरवटुः पुष्पाणि अवचिनोति।

१८. गौरवटुः मनोरमकायः, धवलवर्णीयः, जटाभिः ब्रह्मचारी, प्रायः षोडश–वयस्कः, शङ्खग्रीवः, दीर्घभालः, सुन्दरबाहूपेतः विस्तृतलोचनः च आसीत्

उत्तराणि–३

१९. गौरवटोः कदलीदलकुञ्जायितं कुटीरम्।

२०. कुटीरस्य समन्तात् पुष्पवाटिका आसीत्।

२१. कुटीरस्य पूर्वतः परमपवित्रपानीयं परस्सहस्रपुण्डरीकपटलपरिलसितं पतत्रिकुलकूजितपूजितं पयःपूरितं सर आसीत्।

२२. कुटीरस्य दक्षिण्यस्यां दिशि एकः सुन्दरकन्दरः पर्वतखण्ड आसीत्।

२३. निर्झरझर्झरध्वनिध्वनितदिगन्तरः - झर्झररूपः ध्वनिः झर्झरध्वनिः शाकपार्थिवादिवत् समासः। निर्झराणां झर्झरध्वनिरिति षष्ठीतत्पुरुषसमासः। तेन ध्वनितानि इति तृतीयातत्पुरुषसमासः। तादृशानि दिगन्तराणि यस्य स इति बहुव्रीहिसमासः।

२४. परमपवित्रपानीयम् - परमं च तत् पवित्रं चेति कर्मधारयः, तादृशं पानीयं यस्य तत् इति बहुव्रीहिसमासः।

उत्तराणि-४

२५. श्यामवटुः दर्शनेन अतीव श्यामलः। तस्य भालदेशः चन्दनचर्चितः, वक्षःस्थलं कपूरागुरुचूर्णलिप्तम् आसीत्।

२६. आचार्यपादाः आश्रमे तडागतटे सन्ध्यावन्दनं कुर्वन्ति स्म।

२७. श्यामवटुना आचार्याणां सन्ध्योपासनसामग्री संस्थापिता।

२८. गौरवटुः यवनत्रासेन भीतां बालिकां मधुरं पयः पाययन् मुनिभोज्यं च खादयन् तां सान्त्वयन् प्रहारत्रयं जागरितवान्।

२९. गौरवटुः मरन्दमधुरा अपः पाययन् स्थितः।

३०. सा बाला यवनत्रासेन रोदिति स्म।

३१. गौरवटुना श्यामवटुना च बालिकायाः पितरौ भवनं च परिमार्गणीयानि।

३२. पर्वतशिखरे गौरवटोः श्यामवटोश्च दृष्टिः पतिता।

उत्तराणि-५

३३. तस्य पर्वतस्य कन्दरे एकः समाधौ लीनः महामुनिः निवसति स्म।

३४. ग्रामणी-ग्रामीण-ग्रामाः महामुनिं पूजयन्ति स्म।

३५. महामुनिं केचन जनाः कपिलः इति, अन्ये लोमशः इति, अपरे जैगीषव्यः इति, अन्ये इतरे च मार्कण्डेयः इति विश्वसन्ति स्म।

३६. समाधिमग्नः य आसीत् तं महामुनिं पर्वतशिखराद् अवतरितुं दृष्टवान् गौरवटुः श्यामवटुः च।

उत्तराणि-६

३७. महामुनिः आश्रमाचार्यनिष्ठकाष्ठपीठम् उपाविशत्।

३८. महामुनिः भास्वान् इव उदयगिरिम् इव आश्रमाचार्यनिष्ठकाष्ठपीठम् आरुरोह।

३९. नित्यनियमसम्पादनाय इत्यत्र समासनिर्णयः कार्यः।

४०. महामुनिः सुघटितकायः, प्रगाढजटः, विशालावयवः, अङ्गारनेत्रः, मनोहरवाणीकः च आसीत्।

॥ इति नवमः पाठः ॥